श्रीतरणिस्तोत्रम्

रचयिता

श्री हरिनाथ झा :

साहित्यव्याकरणाचार्य्य :



प्रकाशक :

श्री रेवतीकान्त झा :

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीतरणिस्तोत्रम्

रचयिता

पाटलिपुत्रमण्डलान्तर्गतदयालपुरग्रामवास्तव्यस्य, समस्तमानव-
शिरोऽभ्यर्चितशासनस्य, त्रैकालिक सन्ध्योपासनादि-
सत्कर्मनिष्ठगरिष्ठस्य, झोपाह्वस्य,
श्रीमतो वनवारिशर्मण-

स्तनूजः

श्री हरिनाथ झा :

प्रकाशक :

साहित्यव्याकरणाचार्यपदभूषितश्रीतरणिस्तोत्ररचयितुः
झोपाधिकस्य, श्री हरिनाथशर्म्मण आत्मजन्मा

श्री रेवतीकान्त झा :

(प्रथम संस्करणम्—१००० (वि० सं०—२०२७)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्यपुनर्मुद्रणे प्रकाशने च सर्वेऽधिकाराः
रचयित्रा प्रकाशकेन च स्वायत्तीकृताः

पुस्तक प्राप्तिस्थानम्
पं० श्री हरिनाथ झाः
ग्रा० दयालपुर, पत्रालय चण्डी (पटना)

मुद्रक :
हुंकार प्रेस, न्यू मार्केट पटना—१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभ्यर्थना

अथैवन्तु शिक्षाशास्त्रिणां कृते भास्वत्सन्दर्भे विभिन्नप्रकारकाः रचनाः समुपलब्धाः भवन्ति, परन्तु भक्तिभावनया प्रेरितो मत्पिता यच्छ्रोतरणि-स्तोत्रं प्रणीतवान् तत्सत्यमेवास्मिन्युगे प्रभावोत्पादकं भविष्यतीतिताद-श्यपेक्षा जनसमूहैराद्रीयते।

अथापि च शारीरिकस्वस्थतायै भगवतो भास्करस्याराधना नितान्त-मावश्यकी, तत्पूर्तावैतल्लघुपुस्तकं रसायनकार्यं सम्पादकमितिधारणया प्रकाशने यत्नः।

प्रकाशक :

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्राग्वादः

निरवशेषमानवबृन्देषुधरातलगतेस्वेतद्विदितमेवा'रत यत् पद्मिनी-नायकस्य श्रीमतोभगवद्भास्वतो विमलचरित्रं विविधस्तवादिना श्रीसूर्य-शतकादिनेति न प्रकृते कश्चिद्वक्तुमवसरस्तथाप्यगाधजातकपरम्परा-वलम्बितेविष्टपेऽवारितव्यापारे विकचितमनोभावे कामना केनाप्यवाधि-ताहिविशिष्यतेऽतोनिष्प्रयोजनप्रवृत्तावपि प्रयोजनमनुभवन्नयंजनोऽभिष्ट-देवताक विषयं स्मरन् महामयाब्धिमग्नानां निस्तरणाल्पप्लवं श्रीतरणि-स्तोत्रं निर्माय सुखमनुभवतीति प्रेक्षकाणां स्पृहास्मिन्तनीयसीयदितदा-कृतिरियं सफलास्यादिति ।

हरिनाथ झाः
उच्च विद्यालय तुलसीगढ़
पत्रा० तुलसीगढ़
(पटना)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रीतरणिस्तोत्रम्

रवेर्भूतिं गातुं क इहभुवि सक्ताश्च विदुषां
विनाकारुण्यन्ते क्वचिदपि न गच्छन्ति पदवीम् ॥
यतोगुर्वाह्वेषा लघुगुरुगतिभ्यांधृततनु—
र्मनोभिर्वाग्भिर्वाथच सहननैर्वाह्यविषया ॥१॥

अभूद्दाक्षिण्येयं ममभणतिर्नौरुत्तरविधौ
जगच्चक्षुर्भूतिप्रकथनवृहत्सागरततेः ॥
यदुर्व्यम्भस्तेजोगगनमरुदुत्पादनकला—
प्रगल्भोद्यच्छिल्पाधिगतजगदाभाकथमलम् ॥२॥

तथापि प्रामुग्ध्याद्गणितनिजाचारमतिमा—
नयंगातुंशक्तश्चभवति विवस्वद्गुणगणान् ॥
यथोत्तानं क्रुध्रं निभृतमनसा वामनजनः
समारोढुंधत्ते स्वमतिमतुलां निष्फलममेत् ॥३॥

परञ्चाभिष्टेस्वामिनि सुमुदिते वापिकुपिते
नदासःकौटिल्यं व्रजति परमार्थं वच इदम् ॥
यतोहीशानां वै प्रकृतिजनितासिद्धिरखिला
तुदासानां शश्वत् प्रभुचरण जन्यं रज इति ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सहस्रांशोरुस्रो वियदतिशयारण्यमृगराड्
विदीर्णध्वान्तौघः सुजनमनसः प्रीतिकृदयम् ॥
चतुर्वेदाकारोऽतिचपलगतिर्विश्वचरणे
चकास्तात्संसाराखिलकृतपिता लोहितवपुः ॥५॥
घृणिस्त्रैलोक्येऽयं भगवत इनस्येति विमलो—
विकीर्णोरक्ताङ्गो मुनिजनदृढाक्षिप्रमदभाक् ॥
महाव्याध्यब्ध्यूर्मिभ्रमितवपुषांनौर्हि च नृणाम्
प्रदद्याद्वोहर्षं कमलकुलकान्तिप्रद इह ॥६॥
मयूखश्चाकाशेदिनमणिभवो लोहिततनुः
प्रकीर्णो मेदिन्याञ्च बहुनलिनीशोकहृदयम् ॥
कृषिं सस्यैः पूर्णांकिल विविधभेदैः सफलितां
विकुर्वन्वा नृणां हि वपुरति गोपायतिसदा ॥७॥
मरीचिःखेचैनोदयगिरिमलङ्कर्तुमखिलं
नितान्तं सन्धत्ते किलविमलचेष्टांनियमिताम् ॥
सुधन्या प्राचीदिक् कठिनतपसादिष्टमगमत्
यदीयाङ्केचायंगिरिरतिविहारं समयते ॥८॥
गभस्तिह्युष्णांशोः प्रतिदिशमुदारेण मनसा
विभिद्यध्वान्तौघं मुकुलनलिनं द्योतयति यः ॥
सुभक्तान्तर्निष्ठां निजरतिमुतालोक्य च वरं
प्रयच्छत्युत्कृष्टं सपदि किल तस्मै सुललितम् ॥९॥
तमिस्रघ्नश्चांशुः सकलशुभदायीनिगदितो
विपश्चद्भिश्चास्मिञ्जगतिबहुधा सत्यवचसा ॥
यतोऽह्येतस्यैते क्षितिजलमरुद्व्योमदहना :
प्रतापाः सन्त्येव प्रकृतिजनिताः दृष्टिपथिकाः ॥१०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अयं भानुर्भानोः खलु बहुलयत्नेन सुलभः
सुतत्वज्ञानाम्वै परमपदहंसात्मकभृताम् ॥
मुनीनामप्यस्मिञ्जगतिगदकूपारतरिकः
सुछन्दः सारोवाऽथचमधुरिपोर्लोचन रुचिः ॥११॥
इयान् रश्मिस्त्वैनोभगणछविहृत्प्राक्तनवपु—
र्मुकुन्दाक्ष्णस्त्विड् वा तिमिरसमवर्तीचवनदः ॥
सहस्राख्योवेत्ता चरितसदसत्कर्मण इह
ह्यविद्यादौर्लभ्यो निगमसुलभोविश्व जनकः ॥१२॥
करः पुष्णो लोकं प्रतिपलमलंभर्तुमखिलं
कुरोगाणांशश्वच्छमन इति चोक्तो बलवताम् ॥
पयोभिः केदारान् किल सफलितान्कर्तुमपि च
प्रवृत्तो वेदात्मा यमजनक आस्ते गगनगः ॥१३॥
खचक्रेविक्षिप्तस्तपनकिरणस्तोलयतियो
जगत्कृत्याकृत्यं सुकृतमघरूपञ्च सकलम् ॥
स एवस्तात्साक्षी सुकृतकुकृतानाञ्च मतिमान्
द्वयंकर्तुंशक्तोऽप्ययमिति शुभानां वर इह ॥१४॥
सदाखद्योतीया विमलगगने दीधितिरियं
विकीर्णा स्वर्णाभा कुनरनयनातीतविषया ॥
सुभव्या सत्वाद्याविधिहरिहरैश्चार्चनयुता
विधात्र्यानन्दानां भुवन जननी पालनकरी ॥१५॥
रवेर्धृष्णिर्वैषः समुचितपथा गन्तुमखिलः
समुद्युक्तोव्योम्नि प्रथितभगणान्तर्हितकरः ॥
चतुर्दिक्षुव्याप्तः समविषमभावार्ति रहित :
भवत्वाशीर्युक्तो धृतशरणभक्ताय हि शुभः ॥१६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सुवृष्णिदीप्तांशोर्वलयितखदेशे हि विहरन्
समस्तेलास्वन्तर्गततिमिरभङ्गऽपि परशुः ॥

प्रमतेभौघानां दलनकरणे सिंह इव यः
प्रवृत्तोऽयञ्चास्ति प्रमुखगदजायुः श्रुतिवचाः ॥१७॥

रवेरक्तः पृष्णिः पवनपथचारी प्रतिपलं
ह्यमर्त्यैर्वन्द्योऽयं कृतभुवनलक्ष्यश्च सचलः ॥

विभेत्तालस्यानां द्रुतगतिरहो द्योतितमनाः
विकुर्याद्भक्तानां मुदमतितरां स्वाभिलषिताम् ॥१८॥

सहस्रात्मा धृष्णिर्भगवत इहेनस्य सघनो
वियदव्याप्तोनित्यं भुवि नरवरान् तारयितुमाम् ॥

श्रुतीनां सेतुर्योऽयमतिगदितः पण्डितजनैः
प्रदद्याद्भक्ताय प्रकृतिजनितां भक्तिमतुलाम् ॥१९॥

रवेर्गावोलोकानवसरभवैश्चामृतमयैः
पयोभिर्दत्ताद्यान्प्रकृतिमधुरैः कुर्वत इमान् ॥

दिनस्याद्ये भागे हि सपदि विकीर्णाः दिशि दिशि
विरामं गच्छन्ति प्रणतदलमाप्ते कृतदयाः ॥२०॥

रवेराजानेयाः गिरिपरिमिताः लक्षणयुताः
शताङ्के चक्रैके किल सुघटिताः व्योमपथिकाः ॥

खलीनव्याप्तास्याः ह्यरुणवशगाश्चाति हरिताः
सुह्वे पावन्तोवै जगति तु भयेयुः शुभकराः ॥२१॥

किलेनस्यैतावान् परिधिरुदितश्चित्रिततनु—
र्यदामध्याह्ने स्याज्जनपदसुखेहेतुरखिलः ॥

प्रदिष्टः प्राग्भियों गगनतिलको देवपरिषत्
पुनातु त्रैलोक्यं निजकरसमूहैरनुपदम् ॥२२॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गरीयांश्चैतावान् दिनमणिभवो जातुगगनै
प्रदीप्तो नृणां वै वहुसलिलदानेक्षम इह ॥
अनेकैर्वावर्णैर्मिलितवपुराद्योद्गतिथिः
करोत्वाशीर्वादान् सपदिपरिवेषोरतिभृताम् ॥२३॥
अकृष्यप्रचैश्वर्यं भग तवमहत्पर्वतनिभं
अभएयंवाद्यैर्यं ह्युपमितिविधावब्धिरनलम् ॥
घृणा का वाच्यास्यात्खलुवसुमतीचाल्पविषया
प्रकोपो हे स्वामिन् दहनभुवनाभ्यां प्रलयकृत् ॥२४॥
नरो यः पुण्यात्मा ह्यतिशयसदाचारनिपुणः
सहस्रांशोर्नित्यं मनसि खलु नामानि तु वदन् ॥
सएवार्कं सत्यं व्रजति परमं रत्नखचितं
न पापात्मा कश्चित्तदिति विमलं याति सुफलम् ॥२५॥
दयालुर्वाभास्वाननुनययुतं पालयति यः
कुकर्म्माणं त्यक्तुं सपदि वहुलिप्सां वितनुते ॥
अतः सर्वंत्यक्त्वाविमलमनसा पादयुगलं
भजेद्यः प्राप्नोतित्वरितमखिलं भास्वत इदम् ॥२६॥
क्रतूनां मध्येऽयं प्रमुखपदधारीच हुतभुक्
यतोऽग्निर्हंसाढ्यै प्रभवति मखास्योनिगदितः ॥
अपिप्राग्भिः पाठादिरिति कथितः सोऽपिभगहे
त्वदीयाङ्गोद्भूतो जगति फलदः स्तात्तु निखिलः ॥२७॥
लड़ित्तारामार्गे चरति जठराग्निश्चजठरे
द्वयोर्जन्येहेतुर्भग घृणिरिति प्राक्तवघृणा ॥
कृतंमीमांसाह प्रकृतिरिति सांख्यैश्च कथिता
नतच्छ्रीमञ्चान्यद्वहुतरपथोऽयं यत इह ॥२८॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उपज्ञाभावत्का ननु वलवती हे दिनमणे
यतोऽन्येयेऽस्वप्नाः किलगुरुत आज्ञानमगमन् ।।
कथन्ते नैषास्याद्वियदवनिपातालतमसां
विभेत्रे प्राचेऽस्मैप्रकृतिगुरवे सर्वजगताम् ।।२९।।
धरण्यां यं मर्त्यं तव भग घृणापाति सततं
स एव स्वर्णाङ्गो निजजननसार्थक्यमगमत् ।।
जहात्येषा यं वा स च गदपथौधौ च विहरन्
स्वकीयं ह्युत्कृष्टं जननमपि निस्तत्वमवुधत् ।।३०।।
उपस्थानं कर्तुं किल सविनियोगं यतनिनो
लभन्ते संस्कारं परमवनिजन्मान इह ये ।।
उषः सम्यक् पूषन्नपि च यमपाशाकलितया
सुमुद्राकृत्या ते जगति वहुधार्च्याः सपदि हे ।।३१।।
महाव्याधिक्ष्माभृद्दलनपदवीको घृणिरयं ।।
विवस्वद्वर्ष्मोत्थः श्रुति परमतत्वोऽतितरलः ।।
कवन्धाधानश्चाप्यथ च जलशोष्यो भगणराट्
स्वभक्तानां शश्वन्मुदमतितरां कर्तुमचलः ।।३२।।
यदास्नानंकर्तुं विमलतटमाप्नोति सरितो
नरः स्नात्वाचार्घ्यं दिनमणिकृते यः प्रतिदिनम् ।।
करोतिप्रातर्वैनिगमविहितैर्याति विमलं
सुरत्नालंकारैर्जडितमिनलोकन्तु मतिमान् ।।३३।।
वयं किं सक्तास्ते भग गुणगणंवक्तुमखिलं
नवावाग्गीशोऽपिश्रुतिधरवरः पारमगमत् ।।
फणीशोयं गातुं प्रबलनिजशक्त्यानकुशली
सरस्वत्यास्यस्थापिचयदि न दक्षास्ति भवती ।।३४।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न विघ्नोऽध्वानन्ते भग कतिविधं विस्तृतमहो
विभूतिम्वा धैर्यं कतिपयघृणाऽन्चापिवहुलाम् ।।
अये दिव्यं ज्योतिः प्रवलतमकोपऽन्च विलये
ह्यतोऽसक्ताः स्यामोलघुतरमपि स्वं कथयितुम् ।।३५।।
सुधन्या कालिन्दीतवतनुभवा हे दिनमणे
यदीयाम्भोधारोपमितसुयशोदाप्रियशिशुः ।।
सपत्न्योः संयोगं हि सुरसरिदुक्त्योः समुदितं
प्रयागे या धत्ते व्रजनिखिलगोपेयभुवना ।।३६।।
कुकर्माणः पुत्राः जगतितमसान्धाः कतिपयाः
नरोधं सन्धते जनक इति तेषु क्वचिदपि ।।
उपायैः शिक्ष्याः ये प्रतिपदमनर्हाश्चरविधौ
गुरूणां शश्वद्वा सकलसहनं प्राकृतमहो ।।३७।।
कृतान्तोधन्योवाभगतनुभवः शास्त्रविहितः
यदीयेच्छावर्तिस्थिरचरमयं विष्टपमिदम् ।।
अयस्कायोदण्डी त्रिविधगुणमध्ये तम इयान्
वलीयान् देवेषु प्रथितखरदंष्ट्रायुत उत ।।३८।।
सहस्रंपादा हे भगतव बुधैर्वै निगदिताः
भवत्पुत्रः सौरिर्ह्यपद इतिचाश्चर्यमतुलम् ।।
कुतोऽतश्चोत्प्रेक्षे स्वकृतफलभोगाधिकरणे
प्रपञ्चेकोनायं भवति फलभागी किल कृती ।।३९।।
किमीयो हे भानो त्वयि च महिमा सागरनिभो
यदाधारात्स्रष्टुं कमलवसतिर्दक्ष उचितः ।।
कुतश्चैतन्मौनेे खलु कमलकोषेतु निवसन्
स्वयंवासिद्धः स्याद्धि कथमितरान् साधितुमलम् ।।४०।।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युगानां चत्वारः श्रुतिभणितभेदाः ह्यवितथाः
समस्तेष्वेतेषु प्रकृतिजनिताकारनिभृताः ॥
जगत्स्थित्यै भानो बलवदवतारास्तवतु हे
प्रमोदं कुर्वन्तः सपदि विजयन्ताञ्च जगताम् ॥४१॥
इह ज्योतिश्शास्त्रं किलतपनतेजोमयमिदम्
यदभ्यासे लग्नाः ह्यवनिसुरसंघाः मतिचणाः ॥
त्रिकालज्ञाः लोकेनरपरिषदि प्राञ्च इन हे
प्रसादात्ते किन्नो सपदि हि लभन्ते नरवराः ॥४२॥
इहोर्जेवा चैत्रे प्रतिशरदमस्मैतुसितके
दले षष्ठ्यां चैतं विधिवदुपवास व्रतकरः ॥
अनेकैर्नैवेद्यैस्तदवसरजन्यैः फलमयैः
सुभोगं पुष्णेऽस्ते वितरति फलं ना समयते ॥४३॥
समस्तानामह्नां समुचितमहो भास्वत इदम्
नरस्तस्मिन्यो वै जगति च परित्यज्य लवणम् ॥
अभिष्टं संस्मृत्य प्रणतमनसायद्धिकिमपि
प्रभुंक्ते प्राप्नोति त्वरितमतिदिव्यं वपुरहो ॥४४॥
सदासेव्यंभानोश्चरणयुगलं नान्यदिति वै
सदाध्येयंभानोर्गुणगणमुदारेण मनसा ॥
सदापेयंभानोर्बहुविधसुनामामृतमहो
सदाचर्यं भानोश्चरितमखिलं श्रेष्ठपुरुषैः ॥४५॥
रविश्चादित्योवाभिहिर इतिसूरोदिनमणिः
सहस्रांशुर्भानुर्भग इन इतोऽर्कश्च सविता
तथाषूषा सूर्यस्तपन इति हंसोगिरिहयो—
ऽर्यमातेजोराशिर्ग्रहमणिरिति साक्षी शुभकृताम् ॥४६॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विवस्वान्ब्रध्नोऽहर्पतिरिति च भास्वान् ग्रहपति—
जगच्चक्षुः प्रद्योतन इति हरिद्घोटक उत ॥
त्वष्टस्कृद्वा वैभाकर इति दिवाकृच्च कथितः
प्रभाकृत्खद्योतो द्युतदशमूर्तिर्निगदितः ॥४७॥
सुपद्माक्षश्छायापतिरिति च भास्कृत्तिमिरहा
त्रयीगात्रोऽब्जिन्याः पतिरिति च धाम्नोनिधिरयम् ॥
हिलोकानां भ्राताऽथच सपदि बन्धुर्हिजगतां
त्विषामीशोवैकर्तन इति च मार्तण्ड इति वै ॥४८॥
सुमित्रोवावैरोचन इति च चित्रादिकिरणः
विभावस्वोष्णोऽस्तरणिररुणो ह्यंशुततिकः ॥
चतुष्पञ्चाशद्वा सपदिरविनामानि सुधियः
प्राधानान्येतानि प्रकृतिवशलभ्यानि जगदुः ॥४९॥
क्रियाहीनो दीनोऽपि च बहुदुराचारनिभृतो—
महत्क्रोधीशाठ्योऽथ च बहुलपापाङ्कितततनुः ॥
अविद्याभ्रष्टान्तर्गदजलधिमग्नोऽपिचनरः
रवेर्नाम्नः पाठात्प्रकृतिविमलः सन् विचरतात् ॥५०॥
अपूर्वं श्रीयुक्तं सपदितरणिस्तोत्रममलं
सुधीनां प्रीत्यर्थं च किल हरिनाथेन भणितम् ॥
उषश्चेदं धीराः नियमनिभृताः स्वस्थमनसः
पठित्वासंयान्ति प्रतिदिनमहो काञ्चनवपुः ॥५१॥

इति श्रीतरणिस्तोत्रम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथेनत्तमापनम्

अथोदयगिरौभवन् प्रतिदिनं स्वदेशेचरन्
सरोरुह विमुद्रणे निजमतिं विकुर्वन्करैः ॥
अपारदययानरान् गदभृतोऽतिरक्षन्मुदा
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥१॥

सहस्रकिरणैर्वृतो गिरिहयैर्विलग्नेरथे
स्थितोमिहिर एष उद्यमविधायकोयोनृणाम्
गतागतविवेकभृद्विरलकान्तिरस्तंगते
रविर्वसतु मेऽमले हृदयमन्दिरेभास्वरे ॥२॥

निशाकरविकाशने निशि घृणिं स्वकीयं ददन्
प्रकाशयतियो विधुं गगनमण्डले वर्तुले ॥
समस्तदिविजाधिपोऽखिलरसप्रदातौषधेः
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥३॥

गतित्रयसमावृतो भगगराड्भयमोत्पादको—
विकीर्णकिरणव्रजो विदलितान्धकारो महान् ॥
अपांनिधिरिवाम्भसां निधिरहो बलीयानहो
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥४॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चतुर्युगधृतावतारनिचयो ब्रह्माणांपति—
दिवामणिरहस्करो वलयितेखगोलेवसन् ॥
चलन्नतिजवावृतैर्हयगणैर्निवद्धे रथे
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥५॥
कृषिप्रधनकारणो जलदजीवनो भास्करो—
यदीयतनयाच्छितौ दहति मज्जनेनात्यघम् ॥
प्रचण्डतपनेनयः प्रलयमादधानोऽप्यहो
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥६॥
यदारुणनमस्कृतावसरोद्भवेनामुना
फलेन विविधेनचेच्छति जनो विशेषादरः ॥
तदाफलतिसर्वथा मनसि जायमाना स्पृहा
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥७॥
चलाहकविलीनरश्मिरतिवर्षणे प्रावृषि
निदाघकटुरंशुभिर्बहुलशीतकाले प्रियः ॥
तडिद्दहनवल्लभः कुमुदनीद्युतिध्वंसको—
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥८॥
विशेषितसरश्छविर्विकचपद्मजालैर्विभुः
प्रसाधितसहस्र वृष्णिबलवर्द्धमानच्छटः ॥
विशीर्णवपुषां नृणां सपदि पालनेच्छाश्रितो—
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥९॥
कुकर्मकरिकेशरी विधृतधर्मभक्तार्चितो—
विशालखगराशीनामुदय एष भास्वानिनः ॥
प्रपञ्चधृतचेतसां जगति दुर्गमोयः प्रभुः
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥१०॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वियुक्तदशसंख्ययाकलितमूर्तिरीर्ष्यान्तको —
विदीर्णं निजपृश्निमानवशरीरपापावलिः
सुरत्ननिचयातिभूषितवपुर्महामण्डलो —
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥११॥

सुमन्त्रजपयोगयागनुतिसंस्तवादीनपि
न जान उत हे रवे कथमहं किमाप्नुवमः ॥
तदर्थमघभागिनि प्रकृतितोमयिक्षम्यतां
रविर्वसतु मेऽमले हृदयमन्दिरे भास्वरे ॥१२॥

अघहरममलंवेनक्षमाकारणम्वा
शिवमथहरिकृत्यं योनरः प्रत्यहम्वा ॥
पठति लिखति लोकेऽर्कोदये भक्तिभावो —
विगदकनकदेही सत्वरं जायमानः ॥१३॥

इतीनक्षमापनम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्मत्प्रकाशितपुस्तकानि

१. श्री रामनाममिष्टान्नम्
२. श्री वैद्यनाथरहस्यम्
३. श्री तरणिस्तोत्रम्

श्री रेवतीकान्त झा
ग्राम दयालपुर,
पत्रा० चण्डी, (पटना)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri